# तृतीयोऽध्यायः

## ज्योतिषशास्त्रस्य वेदाङ्गत्वं स्कन्धविवेचनञ्च

## ३.१ ज्योतिषशास्त्रस्य प्रत्यक्षत्वम्

विश्वसाहित्यस्य प्राचीनतमो धर्माधर्मावबोधको भारतीयसंस्कृतिसंवाहक इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकोपायभूतो नानाज्ञानविज्ञानरत्नाकरो ग्रन्थो 'वेदः' प्रकीर्तितः ऋषिभिः । वेदा एव सर्वासां विद्यानां ज्ञानानाञ्च मूलास्सन्ति । सर्वाः सत्यविद्याः वेदेभ्य एव निसृतास्सन्ति । वेदाः ज्ञानराशित्वात् सार्वभौमिकाः, ईश्वरोपदिष्टाः, सेवार्थसाधकाश्च वर्तन्ते । वेदानां भाषाज्ञानदृष्ट्या दुरुहत्वात् दुर्बोधकत्वाच्च वेदानां व्याख्यानं कथं भवेदिति जिज्ञासायामुच्यते- ज्ञानराशिवेदार्थानामवबोधाय वेदाङ्गानि प्रवृत्तानि । तानि चैतानि- शिक्षा-कल्प-व्याकरण-निरुक्त-छन्द-ज्योतिषमिति षट्संख्याकानि सन्ति । एव एवोक्तं निरुक्तकारेण यास्केन —

**"साक्षात् कृतधर्माण ऋषयो बभूवुः । तेऽवरेभ्योऽसाक्षात् कृतधर्मस्य उपदेशेन मन्त्रान् सम्प्रादुः । उपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदं च वेदाङ्गानि च ।"**[42]

वेदार्थावबोधसौकर्यायैव वेदाङ्गानि समाम्नातानि महर्षिभिरिति । षड्वे-दाङ्गाध्ययन्म सर्वत्र निगदितम् । भगवता पतञ्जलिना पश्पशाह्निके प्रोक्तम्—

**"ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च ।"**[43]

इत्युक्तत्वात् षडङ्गाध्ययनमनिवार्यम् । वेदोपकरकत्वादेतेषां षण्णा-मङ्गत्वं नूनमायाति । षड्वेदाङ्गेषु ज्योतिषशास्त्रस्य परिगणना वेदपुरुषस्य

---

[42] निरुक्तम् अध्यायः-१, पृ. सं. ५७

[43] महाभाष्यम्, पश्पशाह्निकम्, पृ. ५

चक्षुरूपेण भवति । समस्तशरीरे ज्ञान-कर्मेन्द्रियेषु नेतरस्य प्राधान्यत्वात् षडङ्गेषु नेतरस्य प्रामुख्यं स्वीचकार भास्कराचार्यः-

**"वेद चक्षुः किलेदं स्मृतं ज्योतिषं मुख्यता चाङ्गमध्येऽस्य तेनोच्यते ।**

**संयुतोऽपीतरैः कर्णनासादिभिश्चक्षुषाङ्गेन हीनो न किञ्चित्करः ।।"[44]**

वेदाङ्गज्यौतिषे आचार्यलगधोऽपि ज्योतिषशास्त्रस्यास्य सर्वश्रेष्ठत्वं प्राकटयन् कथयति- यथा मयूराणां शिखा तेषां मस्तके विराजते, यथा नागानां मणिः मस्तके सुशोभिता भवति तथैव वेदाङ्गशास्त्रे गणितं(ज्योतिषशास्त्रं) मूर्ध्नि संस्थितमस्ति –

**यथा शिखामयूराणां नागानां मणयो यथा ।**

**तद्वद् वेदाङ्गशास्त्राणां गणितं मूर्धनि स्थितम् ।।[45]**

शास्त्रादस्मात् कालबोधो भवति यतः वेदाङ्गत्वं ज्यौतिषस्योत्तमत्वं प्रसिद्धं स्यात् । कथं ज्योतिषशास्त्रस्य वेदोपकारकत्वम् ? शास्त्रस्यास्य किं प्रयोजनम् ? सर्वस्यापि कार्यस्य यत्किञ्चिदपि प्रयोजनमन्ततो गत्वा वर्तत एव । एवं च प्रयोजनस्यास्य सापेक्षत्वमनादिकालादेव समागच्छति । अतो शास्त्राध्ययनात्पूर्वं तच्छास्त्रस्य प्रयोजनमवश्यमेव ज्ञातव्यम् । यथोक्तम् –

**सर्वस्यैव हि शास्त्रस्य कर्मणो वापि कस्यचित् ।**

**यावत्प्रयोजनं नोक्तं तावत् तत्केन गृह्यते ।।[46]**

---

[44] सि.शि.ग्र.ग्र., का.मा. श्लोक-६

[45] वेदाङ्गज्योतिषम्, श्लोकः-३

[46] वे. ई., पृ. सं. ६९

वेदेऽपि यागादिकार्यस्य प्रयोजनम् निर्दिष्टमस्ति । ज्योतिषं वेदस्य नैजं ज्यौतिषायत्तमतं ज्यौतिष्, ज्योतिषशास्त्रस्य वेदाङ्गत्वं स्वीकृतम् ।

सायणाचार्येण ऋग्वेदभाष्यभूमिकायां ज्योतिषशास्त्रस्य प्रयोजनम् समुदिष्टमस्ति- यज्ञकालार्थसिद्धये कालविशेषविधयः श्रूयन्ते । संवत्सरमेतद् व्रतं चरेत्।(तै.आ.१/३२/१) संवर्तसमुख्यं भूत्वा(तै.सं. ५/६/५/१) इत्येवमादयः विधयः । वसन्ते ब्राह्मणोऽग्निमादधीत, ग्रीष्मे राजन्य आदधीत (तै.ब्राह्म.१/१/२/६/७) इत्याद्या मासविधयः । यं कामयेत् वसीयान्स्यादिति तं पूर्वपक्षे याजयेत् (तै.सं./२/३/१) इत्याद्या पक्षविधयः । एकाष्टकायां दीक्षेरन् फाल्गुनीपूर्णमासे दीक्षेरन् (तै.सं.७/४/८/१) इत्याद्यास्तिथिविधयः । प्रातर्जुहोति सायं जुहोति इत्याद्याः प्रातः कालिकविधयः । कृत्तिकास्वाग्निमादधीत (तै.ब्रा.१/१/२/१) इत्याद्याः नक्षत्रविधयः। अतः कालविशेषानवगमयितुं ज्योतिषमुपयुज्यते ।[47]

ज्योतिषशास्त्रस्य प्रयोजनावसरे लगधाचार्येण प्रोक्तं यद् वेदा अस्माकं ज्ञानमूलं कर्ममूलञ्च । वेदस्य प्रवृत्तिर्विशेषेण यज्ञसम्पादनाय भवति । यज्ञसम्पादनाय कालशुद्धेर्महती आवश्यकता भवति । यज्ञार्थमुचितकालस्य निर्णयो कर्त्तव्यः । यतो हि- 'यज्ञो वै श्रेष्ठतमं कर्म' तथा च 'यागादिरेव धर्म' इति श्रुतिवाक्यैः यज्ञस्य सर्वश्रेष्ठकर्मत्वं सिद्ध्यति । यज्ञयागादिकम् अथ च तपोदानव्रतोपवासादिकं किमपि विशिष्टं कार्यं शुभमुहूर्तमाश्रित्यैव भवति । शुभमुहूर्ते कृतं कर्म साफल्यं विपरीतकालेऽनुष्ठितं कर्म वैफल्यं परिणमति । ज्योतिषन्तु कालबोधकं शास्त्रम् । वेदप्रतिपादितयज्ञादिकर्मणां विषये कालस्य ज्ञानं ज्योतिषशास्त्रेणैव भवति । अतः शुभाशुभमुहूर्तसम्पादनेन वेदमुपकरोत्येव ज्योतिषशास्त्रम् । शुभमुहूर्ते क्रियमाणानां

---

[47] ऋ.भा.भू., पृ. १३५

यज्ञयागादिक्रियाविशेषाणां फलप्रवर्तनादेव ज्योतिषशास्त्रस्य वेदाङ्गत्वमुररीकृतं प्राचीनज्योतिर्विद्भिः । उक्तञ्च वेदाङ्गज्योतिषे —

**'वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्वा विहिताश्च यज्ञाः ।**

**तस्मादिदं कालविधानशास्त्रं यो ज्यौतिषं वेद स वेद यज्ञान् ।।**[48]

शुभाशुभमुहूर्तमाकलय्य यज्ञविधानाय ज्योतिषशास्त्रस्यास्य महन्महत्त्वं स्वीकृत्य ज्योतिर्मार्तण्डेन भास्कराचार्येण स्पष्टमुद्घोषितमस्य वेदाङ्गत्वम् । यथा-

**वेदास्तावद् यज्ञकर्मप्रवृत्ताः यज्ञाः प्रोक्तास्ते तु कालाश्रयेण ।**

**शास्त्रादस्मात् कालबोधो यतः स्यात् वेदाङ्गत्वं ज्योतिषस्योक्तमस्मात् ।।**[49]

वैदिककाले कालस्य गुणधर्मविवेचनत्वादेव शास्त्रमिदं 'कालविधानशास्त्रम्' इत्यप्युच्यते स्म । ज्योतिषं विना कालज्ञानाभावो भवति । कालज्ञानं विना श्रौत-स्मार्तकर्म-गर्भाधान-जातकर्म-यज्ञोपवीत-विवाहादयः संस्काराः ऊषरधरायां वपितं बीजमिव निष्फलाः भवन्ति । यथोक्तमपि —

**अतीतानागते काले दानहोमजपादिकम् ।**

**ऊषरे वपितं बीजं तद्वद्भवति निष्फलम् ।।**[50]

अपि च तिथि-वार-नक्षत्र-योग-करणादिज्ञानं विना तडाग-वापी-देवालय-निर्माण-श्राद्धकर्म-पितृकर्म-व्रतानुष्ठान-गृहप्रवेशप्रतिष्ठादीनि कार्याणि (शुभकृत्या-

---

[48] वेदाङ्गज्योतिषम्, श्लोक-४

[49] सि.शि.ग्र.ग्र., का.मा. श्लोक- ६

[50] आ. वराह, पृ. २०

नि) कर्तुं न शक्यन्ते । अनेन सिद्ध्यति यज्ज्योतिषं विना लौकिकं, वैदिकं स्मार्तञ्च किमपि कर्म साफल्यं नोपयाति । उक्तञ्च महर्षिणा नारदेन-

**वेदस्य निर्मलं चक्षुः ज्योतिःशास्त्रमकल्मषम् ।**

**विनेतदखिलं श्रौतं स्मातं कर्म न सिद्ध्यति ।।**[51]

सकलं व्यावहारिकं धार्मिकं सामाजिकञ्च कृत्यं शास्त्रेणानेन सुसम्पन्नतां याति । शास्त्रस्यास्य व्यावहारोपयोगिताः, महत्त्वमवलोक्याचार्यगर्गेण सत्यमेव भणितम्—

**ज्योतिश्चक्रे तु लोकस्य सर्वस्योक्तं शुभाशुभम् ।**

**ज्योतिर्ज्ञानं तु यो वेद स याति परमां गतिम् ।।**[52]

अतो वैदिकलौकिककर्मणां श्रौतस्मार्तकर्मानुष्ठानानां कालावबोधाय वेदाङ्गस्यास्य विशिष्टं महत्त्वमस्ति । येनास्य ज्योतिषशास्त्रस्य वेदाङ्गत्वं सिद्ध्यति ।

## ३.२ ज्योतिषशास्त्रस्य प्रत्यक्षत्वम्

भारतीयचतुर्दशविद्यासु वेदविद्याया अङ्गत्वेन ज्योतिषशास्त्रं व्यवतिष्ठते । यथा —

**अङ्गानि वेदाश्चत्वारो मीमांसान्यायविस्तरः ।**

**पुराणं धर्मशास्त्रं च विद्याह्येताश्चतुर्दश ।।**[53]

---

51 ना. सं., अध्याय-१, श्लोक-७

52 ना.सं., उद्धृतम्, पृ. १०

53 न्या.म. भाग-१, पृ.१०

वेदप्रभोः नेत्ररूपं ज्योतिषशास्त्रं प्रत्यक्षमिन्द्रियग्राह्यमस्ति । तत्र किं नाम प्रत्यक्षम् ? न्यायसूत्रकारेण “इन्द्रियार्थसंनिकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षमिति” प्रोक्तम् । अक्षं अक्षं प्रति प्रत्यक्षमिति । अक्षमिन्द्रियं प्रतिगतम् । इन्द्रियेणानुभूतं प्रत्यक्षप्रमाणं ज्योतिर्विद्भिः बहुप्रतिपादितम् । सर्वैरेव यद्दृष्टं तज्ज्योतिषशास्त्रव्यतिरिक्तमन्येषु शास्त्रेषु परस्परं मतवैभिन्याद् विवादस्याशङ्का जायते । अन्येषु दर्शनशास्त्रेषु विवादेनैव तत्त्वार्थस्य प्रतीतिर्भवति । अस्मादेव कारणात् भारतीयदर्शनेषु वैविध्यं दृश्यते । भारतीयदर्शनवाङ्मये केचन दार्शनिका ईश्वरस्य सत्तां स्वीकुर्वन्ति । केचन ईश्वर: नास्त्येव इत्यामनन्ति । स्वपक्षपोषणार्थं (वर्द्धयितुं) ते भिन्न-भिन्नयुक्तयः प्रमाणानि च समुपस्थापयन्ति । यतो हि शास्त्रेऽस्मिन् यत्किमपि वस्तुजातं प्रत्यक्षं नास्ति तस्य प्रामाण्यं न स्वीक्रियते ।

यथोक्तं कमलाकरभट्टेन-

**सयुक्ता न मन्युक्तरप्यत्र शास्त्रे भवेत् कार्यवर्यस्य दृग्विरुद्धा ।**[54]

अतोऽन्यशास्त्रवत् नात्र वैविध्यस्यावसरः । प्रत्यक्षप्रमाणसिद्धत्वादिदं शास्त्रं प्रत्यक्षशास्त्रमपि निगद्यते । उक्तञ्च-

**अप्रत्यक्षाणि च शास्त्राणि विवादास्तेषु केवलम् ।**

**प्रत्यक्षं ज्योतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ ।।**[55]

---

[54]सि.त.वि. मध्यमाधिकार, श्लो. ५४

[55]वे.ज्यो. श्लो. ४

ज्योतिषशास्त्राध्ययनं न्यायादिशास्त्रवत् वादमात्रफलं नास्ति अपितु चिकित्साशास्त्रवत् प्रत्यक्षदृश्यफलम् । तदुच्यते-

**दृष्टे सम्भवत्यदृष्टकल्पना न न्यायेति दृष्टतार्थस्य शास्त्रस्य ।**

**वादरूपं तु फलं सर्वेष्वपि शास्त्रेषु तुल्यम् ।।**[56]

अन्यच्च-

**अन्यानि शास्त्राणि विनोदमात्रं न किञ्चिदेषां भुविदृष्टमस्ति ।**

**चिकित्सितं ज्योतिषमन्त्रवादाः पदे-पदे प्रत्ययमावहन्ति ।।**[57]

ज्योतिषशास्त्रे प्रत्यक्षताया अर्थोऽस्ति गणितागतपदार्थस्य यथातार्थ्येनोपलब्धिः । अर्थात् गणितेन यस्य पदार्थस्य अध्ययनं क्रियते वेधेनापि तस्य पदार्थस्य तथावत् दर्शनं भवेत् तदेयं “प्रत्यक्षता” इति कथ्यते । उदाहरणार्थं यदि गनितेन पूर्णिमाया भविष्यवाणी विधीयते तदेव वेधेनापि पूर्णः चन्द्रबिम्बः दृष्टिपथमागच्छेत् तदेतन्नामदृग्गणितैक्यमिति । सिद्धान्तेषु कथितं यत् गणितीयविधिनागतस्य परिणामस्य प्रामाण्यं तदैव भवति यदा सैव स्थितिः आकाशे तस्मिन्नैव काले दृग्गोचरीभवेदिति । यथोक्तमाचार्यभास्करेण-

**यात्राविवाहोत्सवजातकादौ खेटैः स्फुटैरेव फलं स्फुटत्वम् ।**

**स्यात् प्रोच्यते तेन नभश्चराणां स्फुटक्रिया दृग्गणितैककृद्या ।।**[58]

---

[56]मुहूर्तचिन्ता. शुभाशुभप्रकरणम्, पृ. सं. ९

[57]मुहूर्तचिन्ता. शुभाशुभप्रकरणम्, पृ. सं. ९

[58]सि.शि.स्प. श्लो. १

तदुपरि ज्योतिषशास्त्रे बहवः एतादृशाः विषयाः सन्ति येषां माध्यमेन ज्योतिषशास्त्रस्य प्रत्यक्षता सिद्ध्यति । यथा- दृग्गणितैक्यतया सैद्धान्तिकज्योतिषस्याङ्गभूतसूर्यचन्द्रयोर्ग्रहणं, उदयास्तत्वम्, चन्द्रशृङ्गोन्नतिः, ग्रहाणां मार्गत्ववक्रत्वपरिज्ञानम्, सूर्योदयबिन्दोवेधेनोत्तरदक्षिणायनज्ञानम्, ग्रहनक्षत्रतारादीनामुत्तरदक्षिणगोलस्थितिः, क्रान्तेत्यादयः विषयाः ज्योतिर्विद्भिः पूर्वमेव पञ्चाङ्गेषु विलिख्यन्ते । तैर्कल्पितं ग्रहगणितं समीचीनमस्ति न वेत्यस्य परीक्षणम् अभीष्टकाले एतेषां दर्शनेन जनैः प्रत्यक्षतः क्रियते । प्रत्यक्षतया तथावत् दर्शनेन कश्चित् लोकोत्तरचमत्कारोऽनुभूयते, अतो ज्योतिषशास्त्रं प्रत्यक्षमेव नास्त्यत्र विमतिः । 'यत्पिण्डे तद्ब्रह्माण्डे' इति वचनानुसारं ज्योतिषशास्त्रं प्रत्यक्षं शास्त्रम् । यतो हि ब्रह्माण्डे सूर्यादिग्रहाणां भ्रमणे ये नियमाः कार्यशीलाः सन्ति त एव मनुष्यशरीरे स्थितस्य सौरमण्डलस्य भ्रमणेऽपि कार्यं कुर्वन्ति । खस्थिताः ग्रहाः शरीरस्थग्रहाणां प्रतीकाः सन्ति । अत एव वराहमिहिरेण भचक्रात्मककाल-पुरुषस्याङ्गेषु ग्रहाणामात्मादिप्रतीकत्वं प्रतिपादितम् ।

### ३.३ ज्योतिषशास्त्रस्य त्रिस्कन्धात्मकप्रभेदाः

ज्योतिषं शास्त्रं प्रथमं गणित-फलिताभ्यां विभागाभ्यां विभक्तम् अभवत् । ज्योतिषशास्त्रे त्रिविधानां कर्मणां फलविचारार्थं त्रिविधापद्धतिरङ्गीकृताऽस्ति। फलितज्योतिषशास्त्रे सञ्चितकर्मणां फलमाधानकुण्डल्यां च त्रिविधग्रह-योगैर्विचार्यते। तत्र प्रारब्धफलस्य विचारो दशान्तर्दशादिभिर्भवति। क्रियमाण-फलस्यच विचारो ग्रहगोचरेण ताजिकशास्त्रेण, प्रश्नादिशास्त्रेण वा विधीयते । ततोऽस्य विभागत्रयं- सिद्धान्तः, संहिता, होरेति नामभिः विहितम् । साम्प्रतं च तत् स्वरूपमेव विकसितमुपलभ्यते । तानि रूपाणि सन्ति- होरा, गणितं, संहिता, प्रश्नः, निमित्तञ्चेति । वैदिककाले ज्योतिषशास्त्रस्य स्वरूपं संहितारूपेण प्राप्यते । परवर्ती-

वेदाङ्गकालान्तं यावत् चक्षुःस्वरूपस्यास्य ज्योतिषशास्त्रस्य त्रयो प्रमुखाः स्कन्धाः जाताः, सिद्धान्तः, संहिता होरा चेति । शास्त्रमिदं सिद्धान्त-संहिता-होराभेदेन त्रिषु स्कन्धेषु विभक्तम् अस्ति अतएव ज्योतिःशास्त्रं त्रिस्कन्धज्योतिषशब्देन अपि ज्ञायते । एषु भेदत्रयेषु नभोगतानां भूगतानाञ्च सर्वेषां पार्थिवपिण्डानां विचारास्तिष्ठन्ति । अत्र विचारक्षेत्रे शुभाशुभविचारोऽपि सन्निहितो मन्यते । पाश्चात्यज्यौतिषं तु केवलं गृहपिण्डानामेव शुभाशुभविचारनिरपेक्षमध्ययनं विधीयते । तेषाममतेन ज्यौतिषं कथ्यते तदत्रत्य ज्यौतिषस्य विभागरूप: सिद्धान्त इति कथ्यते । केत्वादीनां गतेः समुदायस्य च विचारास्तेषां मतेन तत्रैव ज्यौतिषं भवति, परन्त्वत्र तेषां विचारः संहिता विषयो मन्यते । वस्तुतस्तु पाश्चात्यविचारकाः ज्यौतिषस्य गणितीयपक्षमेव गृह्णन्ति ।

ज्योतिषशास्त्रस्य विषयविभागकुर्वन्नाचार्यवराहेणोक्तम् —

**ज्योति: शास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितम्**

**तत्कात्स्र्न्योपनयस्य नाम मुनिभिः संकीर्त्यते संहिता ।**

**स्कन्धेऽस्मिन् गणितेन या ग्रहगतिस्तन्त्राभिधानस्त्वसौ**

**होराऽन्योऽङ्गविनिश्चयश्च कथितो स्कन्धस्तृतीयोऽपरः ।।**[59]

कस्यापि शास्त्रस्य तद्भागप्रभागानां यावत्परिचयो न भवति तावत्तस्य सम्यक् ज्ञानं न जायते । तेनात्र भारतीय ज्यौतिषशास्त्रस्य सम्यक्तया परिचरार्थं मुख्यत्वात् स्कन्धत्रयस्य पृथक् पृथक् स्वरुपविचारो दर्श्यते ।

[59] बृ.सं, अ.-१, श्लो.-९

एतेषु स्कन्धत्रयेषु सिद्धान्तस्कन्धः समग्रकालखण्डस्य गणनाविधिप्रदर्शकः, संहितास्कन्धः भू-प्राकृतिकलक्षणैः समस्तजगतः समष्टिगतफलनिर्देशकः, जातक-ताजिक-प्रश्न-मुहूर्तादिविधिभिः मानवस्य व्यष्टिगतफलसूचकस्य होरास्कन्धोऽवतिष्ठते।

**३.३.१ सिद्धान्तस्कन्धः**

व्युत्पत्ति दृष्ट्या सिद्धः निश्चितोऽन्तः यस्मात् तत्सिद्धान्तः । अथवा 'अन्ते सिद्धः सिद्धान्तः' इति निर्वचनेन निरीक्षणपरीक्षणादिभिः ग्रहागति-सम्बन्धित-यन्मतमन्ते उपस्थाप्यते तदेव सिद्धान्तपदवाचकेन प्राचीनाचार्यैः स्वीकृतम् । वादिप्रतिवादिभ्यां निर्णितोऽर्थः सिद्धान्तेति । स्कन्धेनानेन पञ्चाङ्गसम्बन्धित-गणितस्य युगवर्षायनर्तुमासपक्षहोरामुहूर्तना-डीविनाडी-त्रुट्या-दीनां सूक्ष्माति-सूक्ष्मज्ञानं भवति। भास्कराचार्यानुसारेण स्कन्धेस्मिन् तृट्यादितः प्रलयान्तं यावत् कालगणना, सौर-सावन-नाक्षत्र-चान्द्रादिकालमानानि, ग्रहचारः, सोत्तराः प्रश्नाः च सम्यक्तया निरूपिताः भवन्ति। यथा-

**त्रुट्यादिप्रलयान्तकालगणना मानप्रभेदः क्रमा-**

**च्चारश्च द्युसदां द्विधा च गणितं प्रश्नास्तथा सोत्तराः।**

**भूधिष्ण्यग्रहसंस्थितेश्च कथनं यन्त्रादियत्रोच्यते**

**सिद्धान्त स उदाहृतोऽत्र गणितस्कन्धप्रबन्धे बुधैः ।।**[60]

वस्तुतो ज्यौतिषस्यात्मा गणितमेव । 'गण्यते संख्यायते तद्गणितम्, तत्प्रतिपादकत्वेन तत्संज्ञं शास्त्रं गणितशास्त्रम् । कालविधानशास्त्रस्य परपर्यायं

[60]सिद्धान्तशिरोमणि .ग्र.म.का. श्लो.-६

ग्रहगणितमेव गणितस्कन्धः । यतोऽस्मिन् शास्त्रे शुद्धतायाः विचारो सर्वेभ्योऽपि समधिकमावश्यकं मन्यते । वस्तुतस्तु भारतीयगणितज्यौतिषमपि नैकविधम् । अपि एष्वेव भेदत्रयं विद्यते- सिद्धान्तः, करणम्, तन्त्रश्चेति । एषु भेदेषु कश्चदविशेष भेदोनैव भवति । सर्वेष्वपि मुख्यरूपेण ग्रहगणितमेव भवति । तथापि सिद्धान्ततन्त्रयोः ग्रहगनितोपयोगिगणितमपि तिष्ठन्ति करणनतु केवलं ग्रहगणितमेव। सिद्धान्ततन्त्रयोर्ग्रहगणितोपयोगिगणितेन सह लौकिकगणितमपि भवति । यद्यपि सिद्धान्तस्कन्धस्य त्रिष्वपि प्रभेदेषु विषयभेदो नास्ति तथापि रचनागतभेदस्त्वस्त्येव। यथा- यत्र सृष्ट्यादेर्ग्रहज्ञानं भवति तत्सिद्धान्तम् । यत्र युगादेर्ग्रहज्ञानं भवति तत्तन्त्रम्। यत्र चेष्टशकादेर्ग्रहज्ञानं भवति तत्करणमिति प्रसिद्धमस्ति । बृहत्संहितायां सांवत्सरसूत्राध्याये दैवज्ञानां लक्षणप्रसङ्गे सिद्धान्त-स्कन्धस्यास्यावश्यकत्वं निर्दिष्टमस्ति ।

**"ग्रहगणिते पौलिशरोमकवासिष्ठ सौरपैतामहेषु पञ्चस्वेतेषु सिद्धान्तेषु युगवर्षायनर्तुमासपक्षहोरात्रायाममुहूर्तनाडीप्राणत्रुटित्रुव्याद्यवायवादिकस्य लस्य क्षेत्रस्य च वेत्ता ।"**[61] भास्कराचार्योऽपि सिद्धान्तशिरोमणौ सिद्धान्तस्कन्धस्य माहात्म्यमित्थमुद्घोषयति-

**जनान् जातकसंहिता: सगणितस्कन्धैकदेशा अपि ।**

**ज्योतिः शास्त्रविचारसारचतुरप्रश्नेष्वकिञ्चित्करः ।।**

**यः सिद्धान्तमनन्तयुक्तिविततं नो वेत्ति भीतौ यथा**

**राजा चित्रमयोऽथवा सुघटितः काष्ठस्य कण्ठीरवः ।।**

---

[61]बृ.सं. अ.-१, श्लो.-३

**गर्जत्कुञ्जरवर्जिता नृपचमूरप्यूर्जिताऽश्वादिकै**

**रूद्यानं च्युतचूतवृक्षामथवा पाथोविहीनं सरः ।**

**योषित् प्रोषितनूतनप्रियतमा यद्वन्न भात्युच्चकै-**

**र्ज्योतिः शास्त्रमिदं तथैव विवुधाः सिद्धान्तहीनं जगुः ।।**[62]

अस्य सिद्धान्तस्कन्धस्य त्रयो भेदाः भवन्ति - प्रथमः सिद्धान्तः, द्वितीयं तन्त्रं, तृतीयं करणञ्चेति । सिद्धान्तः- कल्पादितरारभ्य ग्रहगणना यत्र भवति तत्स्कन्धः सिद्धान्तः अथवा यस्मिन् ग्रन्थे सृष्ट्यादितोऽर्हगणं प्रसाद्य ग्रहस्पष्टीकरणं विधीयते स सिद्धान्तः । तन्त्रम्-अभीष्टयुगादितरहर्गणानयनं कृत्वा ग्रहानयनं यत्र क्रियते तत्स्कन्धविशेषः तन्त्रस्कन्धः अथवा यस्मिन् हि ग्रन्थे युगादितोऽर्हनणमानीय ग्रहस्पष्टीकरणं भवति तत्तन्त्रम् । करणम्- अभीष्टशकादितः ग्रहानयनप्रक्रिया करणस्कन्धेऽऽयाति अर्थात्यत्र चेष्टाराकारितोऽर्हगणं निर्माय ग्रहानयनं तत् करणम् । सिद्धान्तग्रन्थस्य विविध-आचार्याः अनन्तरमार्यभट्ट-ब्रह्मगुप्त-वराहमिहिर-भास्कराचार्य-कमलाकरप्रभृतयः । तन्त्रग्रन्थेषु आर्यभट्टस्य आर्यभट्टीयं, करणग्रन्थेषु ग्रहलाघवं, केतकीग्रहगणितं, सर्वानन्दकरणादयो गन्थास्सन्ति । आर्षः- सूर्यसिद्धान्तः, ब्रह्मगुप्तस्य ब्रह्मस्फुटसिद्धान्तः, वराहमिहिरस्य पञ्चसिद्धान्तिका, भास्कराचार्यस्य सिद्धान्तशिरोमणिः, कमलाकरस्य सिद्धान्ततत्वविवेकश्च सिद्धान्तस्कन्धस्यमान्यग्रन्थाः सन्ति । स्कन्धेऽस्मिन् गणितं-खगोलं-ग्रहगणितं-पाटीगणितं-बीजगणितं-कालनिर्णयम् एते विभागाः सन्ति । ब्रह्म-वशिष्ठ-सोम-सूर्यश्चेत्यस्य प्रवर्तकाः सन्ति ।

---

[62]सि.शि. ग्र.म. का. श्लो.-७-८

### ३.३.२ संहितास्कन्धः

यत्र भू-अन्तरिक्ष-ग्रह-नक्षत्र-ब्रह्माण्डानां गतिस्थित्यादिज्ञानेन समष्टिगत-फलनिर्द्धारणमर्थात् समाजस्य राष्ट्रविशेषस्य वा ग्रहानुचरफलं प्रतिपाद्यते न तु व्यक्तिविशेषस्य तदेव संहिताशास्त्रमुच्यते । अर्थात् संहितास्कन्धे ज्योतिषशास्त्रस्य पूर्णत्वेन वर्णनं प्राप्यते । संहिताशब्दस्य व्युत्पत्तिः विषये प्रोक्तमस्ति यत् सम् उपसर्गपूर्वकं डु धाय धारणे धातोः स्त्रीत्वविवक्षायां टा प्रत्यये कृते सति निष्पद्यते । यस्यार्थो भवति कस्यचिदपि वस्तुनः सम्यक्तया अध्ययनमिति ।[63] अर्थात् ग्रहाणां सामूहिकप्रभावो येन ज्ञायते स संहितास्कन्धः सार्वत्रिकविषयः इति कथ्यते । ज्योतिषशास्त्रस्य स्कन्धोऽयभौतिकफलितक्षेत्रेऽतीव महत्त्वपूर्णोऽस्ति । वस्तुतस्तु सर्वेषां स्कन्धानां संक्षेपत्वेन विवेचनं यत्र प्राप्यते तदेव संहितायाः संहितत्वमिति जातम् अथवा संहिताशब्दः प्रायः सङ्कलनार्थे प्रयुक्तो दृश्यते । अत एवोक्तं यत्- "संहितापारगोदैवचिन्तकः", ज्योतिषशास्त्रस्वरूपविषये वराहेणोकतम यत् ज्योतिषशास्त्रं अनेकविशेषविषययुतं वर्तते तत्र च स्कन्धत्रय्म मुख्यतया विभाजितमस्ति, तत्रैव संहिताशास्त्रविभागः समागच्छति। तस्यैव कात्स्र्न्यो-पनयनस्य नाम एव संहिता भवति । कात्स्र्न्यं नाम समवेतरूपमिति। संभवतः ऐतिह्यदृष्ट्या संहिताभागः सिद्धान्तभागादपि प्राचीनतरः प्रतिभाति ।अस्य हि पर्याप्ता विपुला सामग्री वैदिकसंहितायां वैदिकसाहित्ये च समुपलभ्यते। वस्तुतस्तु वेदा एव यज्ञप्रयोजकत्वेन हेतुना तच्च कालाधीनहेतुना कालज्ञानस्यावश्यकता प्रतिपदं भवत्येव । तस्यैव कालविशेषरूपस्य संहिता नाम स्कन्धविशेषः सर्वत्र सामूहिकः प्राभाविकश्च भवति । संहिताभागः सर्वभागेषु विशिष्टतरः प्रतिभाति यतो हि अत्र सर्वे भौगोलिक-सामाजिक-राजनैतिक-आधिदैविक-आधिभौतिक-

---

63 शब्दकल्पद्रुमः

आधिदैहिक-विषयाणां स्पष्टनिदर्शनं सर्वत्र दृश्यते ।यथा-संहितास्कन्धे सामवत्सरसूत्रम्, ग्रहचारः, ग्रहयुतिः, वर्षफलम्, शृङ्गाटकम्, गर्भविवेकः, उल्काविवेकः, प्रतिवर्षकृत्यलक्षणानि, वास्तुवृक्षायुर्वेदः, सकुलविचारेत्यादिफलम्, ग्रहगुचरश्च आद्याः विषयाः विवेचनीयाः, अत एवोक्तं जातम् –

**ज्योतिः शास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितम्**

**तत्कात्स्न्योपनयस्य नाम मुनिभिः संकीर्त्यते संहिता ।**[64]

अस्माद्धेतोः संहिताशास्त्रस्य वेत्ता समाजे विशेषरूपेण पूजनीयो भवति । तथा चोक्तम् –

**संहितापारगश्च दैवचिन्तको भवति ।**[65]

**न तत्सहस्रं करिणां वाजिनां च चतुर्गुणम्।**

**करोति देशकालज्ञो यथैको दैवचिन्तकः।।**[66]

संहितान्तर्गतवक्ष्यमाणविषयास्सन्ति-सूर्यादिग्रहाणां सञ्चारः, तस्मिन् सञ्चारे ग्रहाणां प्रभावः, विकृति-वर्ण-रश्मि-द्युति-ऊर्ध्वाधोगामीतोरणदण्डा-दिसंस्थानम्, ग्रहाणामुदयास्तवक्रानुवक्रेत्यादीनां ज्ञानं संहिताशास्त्रेऽस्मिन् सन्निहितमस्ति । इतोऽपि ग्रहनक्षत्रसमागमः तत्फलमित्यादिकं, अगस्त्यमुनेर्सञ्चारः, वसिष्ठादिसप्तर्षिणां चारः, ग्रहभक्तिः (कस्मिन् देशे कः ग्रहः तत्रावसन्तानां जनानामधिपतिः), नक्षत्रव्यूहः (नक्षत्राणां विभिन्नविभागः), ग्रहशृङ्गाटकम्

---

64 बृ.सं, अ.-१, श्लो.-९

65 बृ.सं., अ.-१, श्लो.-२०

66 बृ.सं, संवत्सरसूत्राध्यायः, श्लो.-३८

(समागमादिलक्षणम्), मेघगर्भलक्षणम् (मेघस्य गर्भधारणद्वारा वृष्टिज्ञानम्), रोहिणी-स्वाती-आषाढी-योगास्तेषां समस्तजगति शुभाशुभप्रभावः, सद्यो-वर्षणस्तथा कुसुमलतेत्यादिनानाप्रकारकैः फलपुष्पादिभिरनुमानं कृत्वा समस्तसंसारस्य शुभाशुभफलज्ञानम्, प्रतिसूर्यः तस्य परिवेषः, उल्कादीनां पातः, दिशां दाहः, भूम्याः कम्पनेत्यादीनां प्राकृतिकघटनानां चिन्तनं क्रियते । कृषि-पर्यावरण-भौतिकचिकित्सा-पशुपक्षिस्वरचेष्टा भूकम्प भूगर्भविज्ञानादीनि समाहितानि सन्ति संहितास्कन्धे । वराहमिहिरस्य कथानानुसारेण प्राकृतिकाकाशघटना-वृष्टि-वायु-वास्तु-मुहूर्त-शकुन-स्वर-रत्न-दर्कागल-वनस्पति-रसायन-स्वप्न-संवेग-मनोवेगेत्यादयः संहितास्कन्धस्य विवेचनीयाः विषयास्सन्ति । संहिताशास्त्रेषु गर्गसंहिता, वसिष्ठसंहिता, भद्रबाहुसंहिता, काश्यपसंहिता, नारदसंहिता, बृहत्संहितेत्यादयः ग्रन्थाः प्रसिद्धाः सन्ति । आर्षत्वेन बार्हस्पत्य-काश्यप-नारदसंहिताः सम्प्रति दृश्यन्ते । यद्यपि बहवः ऋषयः संहितायाः कर्तृत्वेन स्मृता दृश्यन्ते तत्र तत्र ।किन्तु तासु संहितासु वराहमिहिरस्य बृहत्संहिता विषयेऽस्मिन् प्रामाणिको ग्रन्थः वर्तते ।

### ३.३.३ होरास्कन्धः

"जनि प्रादुर्भावे" अर्थात् प्रादुर्भावार्थक जन धातोः जातक शब्दो निष्पद्यते । "ज्ञाजञोर्जा" इति सूत्रेण जन धातोः जादेशे भूतार्थे क्त प्रत्यये कृते जातशब्दः सद्यः प्रसूतार्थे प्रयुज्यते । ततः स्वार्थे कन् अथवा "कुत्सायां कः" इत्यनेन सूत्रेण कन् प्रत्यये कः प्रत्यये वा 'जातक' शब्दो निष्पद्यते । कः प्रत्यये शिशुरूपस्य जातकस्य बोधो भवति । एवं जातकमधिकृत्य कृतं शास्त्रं जातकमित्युच्यते। यथा- 'जातकमिति प्रसिद्धं यल्लोके तदिह कीर्त्यते होरा' । अथवा 'दैवविमर्शनपर्यायः खल्वयं शब्दः' ।

[67]पितामहनारदवसिष्ठकश्यपादिमुनिभिः सुनिर्मितं ज्योतिषशास्त्र-स्यैकस्कन्धरूपं जन्मनानाविधफलादेशफलकं वेदचक्षुरूपं द्विजानामध्ययनीयशास्त्रं होरा शब्द वाच्यम् । अहोरात्रशब्दस्य पूर्वान्त्यवर्णलोपाद्धोरेति शब्दोऽवशिष्यते । अपि च पराशरेण-

**अहोरात्रस्य पूर्वान्त्यलोपाद्धोराऽवशिष्यते ।**[68]

शब्दोऽयं फलितज्यौतिषार्थे रूढ इति मन्ये सौकर्यात् । कल्याणवर्मा यथाऽऽह- **"आद्यन्तवर्णलोपाद्धोराशास्त्रं भवत्यहोरात्रात् । तत्प्रातबद्धश्चायं ग्रहभग्नश्चिन्त्यते यस्मात्।।"**[69]अतो अहोरात्राश्रयत्वात् तदेव होरा शब्दो व्युत्पाद्यते । स्वरूपसिद्धिस्तु- (हिंसासंवरणाद्यर्थकाद् हुरधातोः । हुल हुर हिंसा संवरणयोः - पा.धातुः ) होरतीतिपचाद्यचि टापि हुर्यते इति घञ् प्रत्यये टापि वा सिद्ध्यति । अस्यार्थस्तु लग्नं राश्यर्द्ध रेखा शास्त्रभेदश्चेतिमिदिन्याम् । लग्नेऽर्थे होरा यथा-

**संज्ञा वेश्माष्टमयोश्चतुरस्रं वैपतश्च नवमस्थ ।**

**होरास्तदशजलानां चतुष्टयं कण्टकं केन्द्रम् ।।**[70]

होरासम्बन्धितं शास्त्रं होराशास्त्रमुच्यते । सामान्यतो 'यत्र ग्रहस्थितितिथिनक्षत्रादिद्वारा मनुष्यस्य सुखदुःखाद्यवाप्तिर्निर्णीयते तदेव होराशास्त्रमित्युच्यते । भट्टोत्पलेन- "प्रतिष्ठायात्राविवाहादीनां लग्नग्रहवशेन च शुभाशुभफलं जगति यया निश्चीयते सा होरा इति कथितम् ।" येन ग्रहाणां प्रभावो व्यक्तावयवन्निष्यते सा होरा । अत्र होरा शब्दो अहोरात्र-

---

[67] सा.व. अ.-२, श्लो.-४

[68]बृहत्पाराशरहोराशास्त्रम्, अ.-४, श्लो.-१

[69] सा.व., अ.-२, श्लो.-२

[70]सारावली २/२८

शब्दस्याद्यन्तवर्णलोपान्निष्पद्यते । शात्रेऽस्मिन् जातकस्य जन्मपत्रमाध्यमेन पूर्वजन्मनिकृतस्य प्रारब्धकर्मणश्चाधारेण जातकोऽयमस्मिन् जन्मनि किं शुभाशुभफलं अवाप्स्यतीति व्यपदिश्यते । अतः शुभाशुभकर्मफलसूचकं शास्त्रं होराशास्त्रमिति । होरास्कन्धे के के विषयाः विचार्यन्ते इत्यस्मिन् विषये वराहमिहिराचार्येणोक्तम्-

“होराशास्त्रेऽपि च राशिहोराद्रेष्काणनवांशकद्वादशभागस्त्रिं-शद्भागबला-बलपरिग्रहो ग्रहाणां दिक्-स्थान-काल-चेष्टाभिरनेक-प्रकारकबलनिर्धारणं प्रकृतिधातुद्रव्यजातिचेष्टापरिग्रहो पूर्वजन्मकालविस्मापनप्रत्ययादेश सद्योम-रणायुर्दायदशान्तर्दशाष्टकवर्गराजयोगचन्द्रयोग द्विग्रहादियोगानां नाभसादीनां च योगानां फलान्याश्रयभावावलोकनिर्याणगत्यूकानि तत्कालप्रश्नशुभाशुभ-निमित्तानि विवाहादीनां च कर्मणां करणम् ।”[71]

पञ्चप्रभेदात्मकरूपजातक-ताजिक-मुहूर्त-प्रश्न-स्वप्नसमन्विते

रास्कन्धेऽस्मिन् वैयक्तिकप्रतिपादनेन होराशास्त्रस्य मानवजीवनेऽत्यधिकं महत्त्वं वर्तते ।

होराशास्त्रं जातकं-ताजिकश्च कथ्यते, अयमेव विभागः फलितज्योतिषनाम्ना अपि व्यवह्रियते ।ताजिकशास्त्रे प्रचलितवर्षफलस्य विधानं गणकैः क्रियते । यथा-

**जातकोदितदशाफलं यतः स्थूलकालफलदं स्फुटं नृणाम् ।**

**तत्र न स्फुरति देवविन्मतिस्तद् ब्रुवेऽब्दफलमादिताजिकात् ।।**[72]

---

[71]बृ.सं. अध्याय-१, श्लो.- १

[72] ज्यो.षा. पृ. १०२

वराहमिहिरस्य बृहज्जातकम्, नीलकण्ठस्य ताजिकनीलकण्ठी च विषयेऽस्मिन् प्रामाणिकौ ग्रन्थौ स्त: ।

वस्तुतो भारतीय ज्यौतिषस्य सत्यपि सिद्धान्तसंहिताहोरेति त्रिधाविभाजने व्यावहारिकदृष्ट्या भागद्वयमेव दृष्टिपथमायाति । एकं फलितमपरञ्च गणितमिति । गणिते हि ज्यौतिषपदार्थानां प्रमाणवर्णसंस्थितानां विचारो वैज्ञानिकरीत्या क्रियते । गणिते संजातानां तेषां प्रमाणवर्णस्म्स्थादीनां मानवसमाजस्य व्यक्तिगतजीवने सामूहिके जीवने च कीदृशः प्रभावो भवतीत्यादीनां विचारः फलितस्कन्धे क्रियते । अतएव मानवजीवनस्य प्रत्यक्षसम्बन्धः फलितज्यौतिषेनैव विद्यते ।

प्रत्येकस्य विज्ञानस्य द्वे शाखे भवतः । एका सैद्धान्तिकी अपरा च व्यावहारिकी । यत्र तस्योपयोगात्मकपक्षस्याध्ययनं क्रियते सा व्यावहारिकी । एकमेव भारतीयज्यौतिषशास्त्रस्य फलितपक्षः गणितपक्षस्य पूरको विद्यते इति ।

यद्यपि ज्योतिषशास्त्रे बहवः स्कन्धाः पृथक् पृथक् रूपेण गणयितुं शक्यते यथा सिद्धान्तस्कन्धान्तर्गतेन्तरिक्षविज्ञानम्, पदार्थविज्ञानम्, ग्रहविज्ञानञ्च पृथक् पृथक् स्कन्धार्भवितुमर्हन्ति । तथैव संहितास्कन्धे वास्तुविज्ञानम्, भूविज्ञानम्, भूगर्भविज्ञानम्, पर्यावरणविज्ञानम्, मौसमविज्ञानमेतानि सर्वाण्यपि पृथक् पृथक् रूपेण स्कन्धत्वेन गणयितुं शक्यते ।

एवमेव होरास्कन्धेऽपि मनोविज्ञानम्, रोगविज्ञानम्, जातकविज्ञानम्, भाग्यविज्ञानम् चेति स्कन्धार्भवितुमर्हन्ति परञ्च समासत्वेनाध्याहारो भवति । अत एव ज्योतिषशास्त्रस्कन्धत्रयात्मकम् अभिहितं जातम् । अस्य त्रिस्कन्धात्मकज्योति-

षशास्त्रस्याद्यप्रवर्तकाः अष्टादश मुनयरासन् । तेषां वर्णनं मया पूर्वमेव योग्यस्थले विहितमस्ति ।

## ३.४ ज्योतिषशास्त्रस्य स्कन्धपञ्चकम्

पूर्वमध्यकालस्य मध्ये ज्यौतिषशास्त्रेणान्यान्यपि संशोधनान्यवलोकितानि । अग्रे गत्वा च ज्यौतिषस्य रूपं पञ्चस्कन्धात्मकमभवत् – गणित (सिद्धान्त)-होरा-संहिता-प्रश्न-शकुनभेदात् ।

उक्तं च- केनचित् —

**पञ्चस्कन्धमिदं शास्त्रं होरागणितसंहिताः ।**

**केरलिः[73] शकुनं चेति ज्योतिः शास्त्रमुदीरितम् ।।**

**३.४.१ सिद्धान्तः-** यस्मिन् सृष्ट्यादित इष्टदिनपर्यन्तमहर्गणं निर्माय ग्रहा आनीयन्ते स सिद्धान्तः कथ्यते ।

**३.४.२ तन्त्रम्-** यस्मिन् युगादित इष्टदिनपर्यन्तमहर्गणं निर्माय ग्रहा आनीयन्ते तत्तन्त्रमभिधीयन्ते ।

**३.४.३ करणम्-** यस्मिन् कल्पितेष्टवर्षं युगं मत्वा तस्य युगस्य मध्य एवेष्टदिनपर्यन्तमहर्गणमानीय ग्रहानयनं विधीयते तत् करणमित्युच्यते । करणग्रन्थेषु इष्टशकादेवेष्टदिनपर्यन्तमहर्गणं निर्माय ग्रहाः स्पष्टीक्रियन्ते ।

**३.४.४ प्रश्नः-** आधुनिककाले एवामवलोक्यते यत् समाजे एतादृशाः जनाः अपि भवन्ति येषां प्रश्नशास्त्रं तत्कालफलप्रतिपादकं शास्त्रमस्ति । अस्मिञ्छास्त्रे

---

[73] केरलिः इति पदमत्र प्रश्नशास्त्रस्य कृते प्रयुक्तं वर्तते ।

विभिन्नानां तात्कालिकप्रश्नानां निर्णयः क्रियते । प्रश्नशास्त्रस्यादिमस्वरूपस्य दर्शनमथर्वपरिशिष्टे मिलति, किन्त्वस्य शास्त्रस्य मौलिकग्रन्थानां रचना ख्रीष्टाब्दस्य पञ्चमशतकस्य प्रारम्भकालादेव सञ्जाता । प्रश्नशास्त्रे मुख्यतः चतुर्भिः सिद्धान्तैः फलप्रतिपादनस्य प्रक्रियाऽवलोक्यते । प्राचीनकाले प्रश्नशास्त्रे शुभाशुभफल-विचारस्यैका विलक्षणपद्धतिरासीद् या च प्रश्नाक्षरसिद्धान्तरूपेण सम्प्रति स्मर्यते ।

**३.४.५ शकुनः-** अस्य शकुनशास्त्रस्यान्यन्नाम निमित्तशास्त्रमपि लभ्यते । ज्योतिषीयशकुनशाखयाऽपि आधुनिकपरिप्रेक्ष्ये महती कल्पना समाजे प्रस्थापिता । एतस्याङ्गस्याधुनिककाले जनानामुपरि विशेषप्रभावो भवति । जनाः अस्मिन् बहुरुचिमपि गृह्णन्ति । यथा ज्योतिषशास्त्रस्य प्रवर्तकरूपेण सूर्यादयः अष्टादशप्रमुखाचार्याः विराजन्ते तथैव शकुनशास्त्रस्यापि अत्रिगर्गादयः नवप्रमुखाचार्याः प्रवर्तकरूपेण राजन्ते । यथा —

**अत्रि-गर्ग-गुरु-शुक्र-वसिष्ठ-व्यास-कौत्स-भृगु-गौतममुख्याः।**

**ज्ञानिनो मुनिवरा हितभावात् संविदं निजगदुः शकुनानाम् ।।**[74]

शकुनशास्त्रस्य प्रभावक्षेत्रं तु बहुविस्तीर्णमस्तीति येन द्वारा पूर्वमेव कस्याश्चिद्घटनायाः कस्यचिद् विषयवस्तुनः शुभाशुभकर्मणः सिद्धेः ज्ञानं च भवति।शकुनस्य उपयोगिता तु नित्यं पुराकालाद् अद्यावधिपर्यन्तं दृश्यते एव । कस्यापि वस्तुनः विषयस्य वा अस्वीकृतिः सामान्यवार्ता, परन्तु कस्यापि वस्तुनः विषयस्य वा रहस्यं ज्ञात्वा तथ्यं च परीक्ष्य तत्स्विकृतिः विशिष्टा वार्ता भवति । शकुनशास्त्रस्य इदमेव रहस्यं यत् प्रत्येकघटनायाः सूचना प्रागेव लभ्यते । ज्योतिषशास्त्रे शकुनस्यानेकाः भेदप्रभेदाः सन्ति । विभागदृष्ट्या शकुनस्य द्वौ भेदौ

---

[74] बृ.सं, शकुनाध्यायः

भवतः, प्रथमस्तु व्यष्टिशकुनं, द्वितीयः भेदः समष्टिशकुनम्। व्यष्टिशकुनैः व्यक्तिविशेषस्य शुभाशुभघटनाः व्यञ्जयन्ते, समष्टिशकुनैस्तु समष्टिघटनानां पूर्वानुमानं क्रियते । महान्तः शाकुनविदः वसन्तराजः वदति —

**यदस्ति किञ्चिज्जगतीह वस्तु, स्मृतं श्रुतं स्पृष्टमथापि दृष्टम् ।**

**स्वप्रान्तराद्यत् प्रतिपादितं तत्, फलप्रदत्वाच्छकुनं वदन्ति ।।**[75]

वसन्तराजस्तु शकुनानि प्रमाणत्वेन स्वीकरोति । यथा लोके वेदाः प्रमाणं, यथा अष्टादशस्मृतयः प्रमाणं, यथा अष्टादशपुराणानि प्रमाणं तथैवविशुद्ध-बोधाव्यभिचारिभावात् शकुनागमः शकुनसिद्धान्तोऽपि प्रमाणम्। यथोक्तम्- “वेदाः प्रमाणं स्मृतयः प्रमाणं लोके पुराणानि यथा प्रमाणम्। विशुद्धबोधा-व्यभिचारिभावात्तथा प्रमाणं शकुनागमोऽयम्।।”प्राचीनैः शकुनशास्त्रिभिः प्रमुखरूपेण पञ्च[76]विधानि शकुनानि कथितानि —

१ (कस्यचित् सजीवस्य निर्जीवस्य वा वस्तुनः) दर्शनम्, २ तस्य शब्दः, ३ गमनम्, ४ चेष्टा, ५ उत्पातः । अन्यैश्च शकुनज्ञैरष्टविधानि शकुनानि स्वीकृतानि । तानि- १ भौमः, २ उत्पातः, ३ स्वप्नम्, ४ उल्कापातः, ५ शरीरचिह्नम्, ६ अङ्गस्फुरणम्, ७ लक्षणम्, ८ स्वरोदयः । पूर्वमध्यकालं यावदनेन शास्त्रेण पृथक् स्थानं नाधिगतमासीत्, किन्तु संहितान्तर्गत एवास्य विषयो भवति स्म ।

## ३.५ ज्योतिषशास्त्रस्य स्कन्धाष्टकम्

केचनदैवज्ञाः ज्यौतिषस्य स्कन्धाष्टकमपि स्वीकुर्वन्ति । अर्थात् प्रथमः स्कन्धस्तु सिद्धान्तः, द्वितीयश्च संहिता । तत्र फलितस्य षट् भेदा- जातक-ताजिक-

75 वसन्तराजशाकुनम्, शास्त्रप्रभाववर्णनप्रकरणम्

76 दै.व. पृ. १८

मुहूर्त-प्रश्न-रमल-केरला भवन्ति । तत्र जातकात् कस्यचिन्नरस्य जन्मपत्रीमाध्यमेन गर्भाधारणादारभ्य मृत्युपर्यन्तं शुभाशुभफलस्यादेशः।

- ताजिकात्- कस्यचिन्मानवस्य गताब्दवशेन वर्षैकपर्यन्तं नानाविधः फलादेशः ।
- मुहूर्तात् - जातकादिसकलकर्मणां मुहूर्तज्ञानम्।
- प्रश्नात् - प्रश्नकुण्डलीमाध्यमेन कस्यचिद् व्यक्तेः सकलशुभा-शुभफलादेशः।
- रमलात्- प्रस्तारद्वारा सर्वविधस्य शुभाशुभफलस्य ज्ञानम्।
- केरलात्- प्रश्नाक्षरैः सकलशुभाशुभस्य ज्ञानम् । इति।